# लवकुशौ

श्रीरामः अयोध्यायाः नरपतिः आसीत्। तस्य द्वौ पुत्रौ अभवतां-

लवः कुशः चेति। बाल्यावस्थायां किल तौ स्वजनन्या सीतया सह

वाल्मीकेः आश्रमे अवसताम्। तत्र च गुरोः वाल्मीकेः सकाशात्

रामायणम् अपठताम्। तत्र वटुभिः सह अक्रीडताम्।

गुरोः अनुशासने अतिष्ठताम्।

एकदा श्रीरामः अश्वमेधयागम् अकरोत्। तदा दिग्विजयाय अश्वम्

अमुञ्चत्। ततः एका विशाला सेना अश्वम् अन्वगच्छत्।

लक्ष्मणस्य पुत्रः चन्द्रकेतुः सेनायाः नायकः आसीत्। यावत् तुरगः

आश्रममार्गेण अगच्छत् तावत् लवकुशौ तम् अपश्यताम्।

कौतुकेन तं गृहीत्वा आश्रमम् अनयतां च। अनन्तरम् अश्वरक्षकः चन्द्रकेतुः तत्रागत्य तौ अकथयत्- "शीघ्रं त्यजतं एतं श्रीरामस्य यागाश्वम् अथवा मया सह युद्धं कुरुतम्।" बालौ अवदतां - "वीराः! वयं वाल्मीकिशिष्याः निर्भयाः च। न कस्यापि प्रभुत्वं सोढुं शक्नुमः। न त्यजामः अश्वं, युद्धाय सज्जाः भवत।" ततः उभयोः मध्ये युद्धम् अभवत्। युद्धे च लवकुशौ लीलयैव चन्द्रकेतुम् अजयताम्। इदं ज्ञात्वा लक्ष्मणः तत्रागच्छत्। तौ तमपि अजयताम्। अन्ते श्रीरामः स्वयं तत्रागच्छत् अवदत् च - "भोः बालकौ, शीघ्रं त्यजत एनम् अश्वम्। तद्वचनमपि अमन्यमानौ तौ तेनापि सह युद्धाय उद्यतौ अभवताम्। अत्रान्तरे शिष्यैः निवेदितः महर्षिः वाल्मीकिः ससंभ्रमं तत्रागत्य युद्धात् तौ न्यवारयत्। परस्परं परिचयम् अकारयत् च।

लवकुशौ श्रीरामस्य पादयोः अपतताम्। श्रीरामः अपि सुतौ परिष्वज्य नितराम् अतुष्यत्।